# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा- दिसम्बर-२०१८

| | | |
|---|---|---|
| कक्षा – **शास्त्री-०२ सेमेस्टर-०३** | **प्रश्नपत्रम्- ०७** | गुणाः - ७० |
| विषयः– पौरोहित्यम् | कोड – CE 2.3.3 (NEW &OLD) | समयः –२:०० तः ०५:०० |
| दिनाङ्कः – ११/१२/२०१८ | ग्रन्थः – याज्ञवल्क्यस्मृतिः | |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोः श्लोकयोः व्याख्या कार्या ।** १०

(१) स्मृत्याचारव्यपेतेन मार्गेणाऽऽधर्षितः परैः ।
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥

(२) छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ।
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥

(३) वासनस्थमनाख्याय हस्तेऽन्यस्य यदर्प्यते ।
द्रव्यं तदौपानिधिकं प्रतिदेयं तथैव तत् ॥

**प्रश्नः २ कस्यचिदेकस्य निबन्धात्मकमुत्तरं लिखित।** १०

(१) मातृकाप्रकरणम् ।

(२) ऋणादानप्रकरणम् ॥

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु श्लोकेषु द्वयोः व्याख्या कार्या।** १०

(१) त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता ।
तत्सत्यं वद कल्याणि ! संशयान्मां विमोचय ।

(२) त्वमग्ने ! सर्वभूतानामन्तश्चरसि पावक ।
साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम ॥

(३) पितृद्रव्याविरोधेन यदन्यत्स्वयमर्जितम् ।
मैत्रमौद्वाहिकं चैव दायादानां नतद्भवेत् ॥

**प्रश्नः ४ कस्यचिदेकस्य निबन्धात्मकमुत्तरं लिखित।** १०

(१) दिव्यप्रकरणम् ।

(२) दायविभागप्रकरणम् ।

**तृतीयान्वितिः**

**प्रश्नः ५ निम्नाकिङ्तेषु कयोश्चिद् द्वयोः श्लोकयोः व्याख्या कार्या ।** १०

(१) अभिगन्तास्मि भगिनीं मातरं वा तवेति ह ।
शपन्तं दाप्येद्राजा पञ्चविंशतिकं दमम् ॥

(२) वसानस्त्रीन्पणान्दण्डयो नेजकस्तु परां शुकम् ।
विक्रयावक्रयाधानयाचितेषु पणान्दश ॥

(३) क्षुद्रमध्यमहाद्रव्यहरणे सारतो दमः ।
देशकालवयःशक्ति संचिन्त्यं दण्डकर्मणि॥

**प्रश्नः ६ एकस्य निबन्धात्मकमुत्तरं लिखित। १०**

(१) स्त्रीसंग्रहप्रकरणम्॥

(२) प्रकीर्णप्रकरणम् ॥

**प्रश्नः ७ केषाञ्चित् दशप्रश्नाः समाधेयाः। १०**

(१) विवादेषु कः व्यवहारः?

(२) अर्थशास्त्रात्तु किं शास्त्रं बलवत् ?

(३) विवाहे कति प्रमाणानि ?

(४) मातृकाप्रकरणे कति श्लोकाः सन्ति ?

(५) वसिष्ठमतेन रसस्य कीदृशी वृद्धिः ?

(६) किं नाम उत्तमसाहसम् ?

(७) याज्ञवल्क्यस्मृतौ कति अध्यायाः सन्ति ?

(८) अपविद्धसुतः कः ?

(९) पशूनां परक्षेत्रे सस्यभक्षणे कः दण्डः?

(१०) गृहीतं चेतनं यः कर्म त्यजनि तस्मे कृते कः दण्डः?

(११) व्यवहाराध्याये कतिप्रकरणानि सन्ति ?

(१२) के साक्षिणो न भवन्ति ?

(१३) औरसपुत्रस्य लक्षणं किम्?

(१४) क्षेत्रजपुत्रस्य लक्षणं किम् ?

(१५) 'द्विगुणो दमः' इति कथनेन किं ज्ञायते ?

***